0755CH08

## सप्तमः पाठः

# त्रिवर्णः ध्वजः



*(केचन बालकाः काश्चन बालिकाश्च स्वतन्त्रता-दिवसस्य ध्वजारोहणसमारोहे सोत्साहं गच्छन्तः परस्परं संलपन्ति।)*

**देवेशः** – अद्य स्वतन्त्रता-दिवसः। अस्माकं विद्यालयस्य प्राचार्यः ध्वजारोहणं करिष्यति। छात्राश्च सांस्कृतिककार्यक्रमान् प्रस्तोष्यन्ति। अन्ते च मोदकानि मिलिष्यन्ति।



**डेविडः** – शुचे! जानासि त्वम्? अस्माकं ध्वजः कीदृशः?

**शुचिः** – अस्माकं देशस्य ध्वजः त्रिवर्णः इति।

**सलीमः** – रुचे! अयं त्रिवर्णः कथम्?

**रुचिः** – अस्मिन् ध्वजे त्रयः वर्णाः सन्ति, अतः त्रिवर्णः। किं त्वम् एतेषां वर्णानां नामानि जानासि?

**सलीमः** – अरे! केशरवर्णः, श्वेतः, हरितः च एते त्रयः वर्णाः।

**देवेशः** – अस्माकं ध्वजे एते त्रयः वर्णाः किं सूचयन्ति?

**सलीमः** – शृणु, केशरवर्णः शौर्यस्य, श्वेतः सत्यस्य, हरितश्च समृद्धेः सूचकाः सन्ति।

**शुचिः** – किम् एतेषां वर्णानाम् अन्यदपि महत्त्वम्?

© NCERT not to be republished

**डेविडः** – आम्! कथं न? ध्वजस्य उपरि स्थितः केशरवर्णः त्यागस्य उत्साहस्य च सूचकः। मध्ये स्थितः श्वेतवर्णः सात्त्विकतायाः शुचितायाः च द्योतकः। अधः स्थितः हरितवर्णः वसुन्धरायाः सुषमायाः उर्वरतायाश्च द्योतकः।

**तेजिन्दरः** – शुचे! ध्वजस्य मध्ये एकं नीलवर्णं चक्रं वर्तते?

**शुचिः** – आम् आम्। इदम् अशोकचक्रं कथ्यते। एतत् प्रगतेः न्यायस्य च प्रवर्तकम्। सारनाथे अशोकस्तम्भः अस्ति। तस्मात् एव एतत् गृहीतम्।

**प्रणवः** – अस्मिन् चक्रे चतुर्विंशतिः अराः सन्ति।

**मेरी** – भारतस्य संविधानसभायां 22 जुलाई 1947 तमे वर्षे समग्रतया अस्य ध्वजस्य स्वीकरणं जातम्?

**तेजिन्दरः** – अस्माकं त्रिवर्णः ध्वजः स्वाधीनतयाः राष्ट्रगौरवस्य च प्रतीकः। अत एव स्वतन्त्रतादिवसे गणतन्त्रदिवसे च अस्य ध्वजस्य उत्तोलनं समारोहपूर्वकं भवति।

जयतु त्रिवर्णः ध्वजः, जयतु भारतम्।

© NCERT not to be republished


## शब्दार्थाः

| | | |
|---|---|---|
| **त्रिवर्णः ध्वजः** | – तीन रंगों वाला झंडा (तिरंगा झंडा) | tricolour flag |
| **संलपन्ति** | – वार्तालाप करते हैं/करती हैं | talk |
| **प्रस्तोष्यन्ति** | – प्रस्तुत करेंगे/करेंगी | will present |
| **मोदकानि** | – लड्डू | a kind of sweet |
| **ऊर्जस्वितायाः** | – ऊर्जा की | of energy |
| **अराः** | – तीलियाँ | spokes |
| **उत्तोलनम्** | – ऊपर उठाना/फहराना | hoisting |





Reprint 2024-25




**1. शुद्धकथनस्य समक्षम् 'आम्' अशुद्धकथनस्य समक्षं 'न' इति लिखत-**

(क) अस्माकं राष्ट्रस्य ध्वजे त्रयः वर्णाः सन्ति। ☐

(ख) ध्वजे हरितवर्णः शान्तेः प्रतीकः अस्ति। ☐

(ग) ध्वजे केशरवर्णः शक्त्याः सूचकः अस्ति। ☐

(घ) चक्रे त्रिंशत् अराः सन्ति। ☐

(ङ) चक्रं प्रगतेः द्योतकम्। ☐

**2. अधोलिखितेषु पदेषु प्रयुक्तां विभक्तिं वचनं च लिखत-**

| | पदानि | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा- | त्रयाणाम् | षष्ठी | बहुवचनम् |
| | समृद्धेः | ................ | ................ |
| | वर्णानाम् | ................ | ................ |
| | उत्साहस्य | ................ | ................ |
| | नागरिकैः | ................ | ................ |
| | सात्त्विकतायाः | ................ | ................ |
| | प्राणानाम् | ................ | ................ |
| | सभायाम् | ................ | ................ |

**3. एकपदेन उत्तरत-**

(क) अस्माकं ध्वजे कति वर्णाः सन्ति?

(ख) त्रिवर्णे ध्वजे शक्त्याः सूचकः कः वर्णः?

(ग) अशोकचक्रं कस्य द्योतकम् अस्ति?

(घ) त्रिवर्णः ध्वजः कस्य प्रतीकः?

**4. एकवाक्येन उत्तरत-**

(क) अस्माकं ध्वजस्य श्वेतवर्णः कस्य सूचकः अस्ति?

© NCERT not to be republished

(ख) अशोकस्तम्भः कुत्र अस्ति?
(ग) त्रिवर्णध्वजस्य उत्तोलनं कदा भवति?
(घ) अशोकचक्रे कति अराः सन्ति?

**5. अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

(क) अस्माकं त्रिवर्णध्वजः विश्वविजयी भवेत्।
(ख) स्वधर्मात् प्रमादं वयं न कुर्याम।
(ग) एतत् सर्वम् अस्माकं नेतॄणां सद्बुद्धेः सत्फलम्।
(घ) शत्रूणां समक्षं विजयः सुनिश्चितः भवेत्।

**6. उदाहरणानुसारं समुचितैः पदैः रिक्तस्थानानि पूरयत-**

| | शब्दाः | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| यथा- | पट्टिका | षष्ठी | पट्टिकायाः | पट्टिकयोः | पट्टिकानाम् |
| | अग्निशिखा | सप्तमी | अग्निशिखायाम् | ................ | ................ |
| | सभा | चतुर्थी | ................ | सभाभ्याम् | ................ |
| | अहिंसा | द्वितीया | अहिंसाम् | ................ | ................ |
| | सफलता | पञ्चमी | ................ | सफलताभ्याम् | ................ |
| | सूचिका | तृतीया | सूचिकया | ................ | ................ |

**7. समुचितमेलनं कृत्वा लिखत-**

| क | ख |
|---|---|
| केशरवर्णः | प्रगतेः न्यायस्य च प्रवर्तकम्। |
| हरितवर्णः | 22 जुलाई 1947 तमे वर्षे जातम्। |
| अशोकचक्रम् | शौर्यस्य त्यागस्य च सूचकः। |
| त्रिवर्णः ध्वजः | सुषमायाः उर्वरतायाः च सूचकः। |
| त्रिवर्णध्वजस्य स्वीकरणं | स्वाधीनतायाः राष्ट्रगौरवस्य च प्रतीकः। |

© NCERT not to be republished



Reprint 2024-25